विद्युद्दूतः

vidyud-dūtaḥ

क्रमाङ्कः एकादशः

Issue: 11th

वसुधैव कुटुम्बकम्
INTERNATIONAL ASSOCIATION OF SANSKRIT STUDIES
अन्ताराष्ट्रियसंस्कृताध्ययनसमवायः

१/९/२०१५

1/9/2015

## *षोडशं विश्व-संस्कृत-सम्मेलनम्*

थाइलैण्डदेशस्य राजधान्यां बैङ्काकनगरे अस्मिन् वर्षे (२०१५) अष्टाविंशतिजून- दिवसाद् द्विजुलाईपर्यन्तं षोडशं विश्व-संस्कृत-सम्मेलनं सम्पन्नम् । सम्मेलनमिदम् अन्ताराष्ट्रिय-संस्कृताध्ययन-समवायस्य तत्त्वावधाने शिल्पाकोर्न-विश्वविद्यालयस्य प्राच्यभाषा-विभागाङ्गभूतेन संस्कृत-शिक्षाकेन्द्रेण समायोजितम् । रिनाशाँहोटले आयोजितस्य अस्य सम्मेलनस्य उद्घाटनं थाइदेश-राजकुमारी-महाचक्री-सिरिन्धौर्नमहोदयया कृतम् । मुख्यातिथिरूपेण विराजमानाऽऽसीद् भारतराष्ट्रस्य विदेशमन्त्रिणी श्रीमती सुषमा-स्वराज महोदया, या स्वकीयं समग्रं सम्भाषणं संस्कृतभाषयैव प्राददत् , सर्वेषां प्रशंसाभाजनञ्चाभूत् । तया विशेषरूपेण उक्तं यद् अद्य अत्र सम्मेलने ऽन्ताराष्ट्रिय-संस्कृताध्ययन-समवायस्य ध्येयवाक्यं ‘वसुधैव कुटुम्बकम्’ इति चरितार्थीभूतं दृश्यते, यदस्मिन् षष्टिदेशेभ्यः षट्शतं प्रतिनिधयः उपस्थिताः । उद्घाटनसमारोहे स्काटलैण्डदेशस्य ऐडिनबरा- विश्वविद्यालयस्य ऐमेरिटसाचार्येण जे. एल. ब्रोकिंगटनमहाशयेन बीजभाषणं ‘पूर्वाभिमुखं रामस्य यात्रा’ इति विषयमवलम्ब्य प्रदत्तं, समग्रे दक्षिणपूर्वैशियाप्रखण्डे रामायणस्य रामकथायाश्च प्रभावः प्रपञ्चितः । संस्कृत- समवायस्य अध्यक्षवर्येण प्रो. कुटुम्बशास्त्रिमहोदयेन आई.ए.एस.एस इति संस्थायाः, प्रकृतसम्मेलनस्य, संस्कृतमहत्त्वस्य च विषये बहु भाषितम् । अस्मिन्नवसरे संस्कृतशिक्षाकेन्द्रस्य पक्षतः एका स्मारिका, एकं शोधपत्र-साररूपं पुस्तकम्, महामहिमराजकुमार्यभिनन्दनग्रन्थश्च लोकार्पितानि जातानि । उद्घाटनानन्तरं सामूहिकसत्रे चतुर्भि-र्मनीषिभिः संस्कृतस्य विविधपक्षानाश्रित्य स्वविचाराः प्रकटीकृताः । सायंकाले विदेशमन्त्रिण्याः श्रीमत्याः सुषमाया उपस्थितौ भारत-सर्वकारस्य विदेशमन्त्रालयपक्षतः थाइलैण्डस्य भारतीयदूतावासेन बृहद्भोजस्यायोजनं कृतम् , यत्र थाइदेशीय-कलाकारैः नृत्यादिकं सङ्गीतं च प्रस्तुतम् । अस्मिन्नवसरे सर्वेभ्यः भारतशासनपक्षतः पुस्तक-पिटकोपायनमपि प्रदत्तम् । अपरे च दिने सायंकाले भारत-सांस्कृतिक-सम्बन्ध-परिषदः सौजन्येन वाराणसीतः आमन्त्रितया संस्थया भासकृतं ‘कर्णभारं’ नाम नाटकं प्रायोजितं, येन सर्वे देशीया वैदेशिकाश्चापि विद्वांसः सहृदयाः परमप्रसन्ना अभवन् ।

संस्कृतस्य भारतीयविद्यानाञ्च विविधपक्षानाश्रित्य एकविंशतिवर्गेषु विभज्य भिन्न-भिन्न-कक्षेषु विभिन्नानि सत्राणि प्रचलितानि, यथा — वेदः, भाषाशास्त्रं, व्याकरणं, रामायणं, महाभारतं च, पुराणानि, आगमास्तन्त्रं च, विध्यनुष्ठानविमर्शः, काव्यम् , अलङ्काराश्च, वैज्ञानिकं वाङ्मयं, बौद्धविद्या, जैनविद्या, वैष्णवमतं, शैवमतं च, धर्मविमर्शः, दर्शनानि, तत्त्वशास्त्रम् , इतिहासः, कला, स्थापत्यम् , अभिलेखशास्त्रं च, संस्कृतं प्रदेशभाषाश्च, संस्कृतशिक्षाशास्त्रम् , आधुनिकं संस्कृतसाहित्यं, संस्कृतं विज्ञानतान्त्रिकी च, हस्तलेखविज्ञानं, धर्मशास्त्रम् , अर्थशास्त्रं च । केचिद् विशेषविषयानवलम्ब्य विशिष्टा वर्गा अपि प्रवर्तिता यथा – नाट्यशास्त्रम् , अस्य विविधायामाः, दक्षिण-पूर्व-एशियायां संस्कृतं, वैदिकगणितं, सूत्रं, स्मृतिः शास्त्रं च, संस्कृतम् एवं दूरस्थशिक्षा इत्यादि । इमान् विषयानाश्रित्य प्रस्तुतेषु शोधपत्रेषु विदुषां भूयसी चर्चापि प्रचलिता ।

उद्घाटनदिवसात् पूर्वं सन्ध्यायाम् अन्ताराष्ट्रिय-संस्कृताध्ययन-समवायस्य सर्वोच्चपरिषदः, तृतीये दिवसे अस्य समवायस्य परामर्शदात्र्याः समितेः उपवेशनं जातम् । पञ्चमे दिने समवायस्य सामान्यसभाया उपवेशनं जातम् , यत्र अनेके व्यवस्थाविषका निर्णया अङ्गीकृताः । एषु समवाय-महासचिवेन डा. जयेन्द्रसोनी-महोदयेन सकला व्यवस्था सुष्ठु विहिता । चतुर्थे दिवसे सायंकाले स्थानीय-संस्कृत-शिक्षाकेन्द्रपक्षतः सान्ध्यभोजनमायोजितम् , यस्मिन् नैके मनोरञ्जका नृत्य-गीत-कार्यक्रमाः प्रस्तुताः । सम्मेलनस्यान्तिमे पञ्चमे दिने राष्ट्रिय-संस्कृत-संस्थानपक्षतः एका शास्त्रचर्चा समायोजिता, यत्र विदुषां मध्ये शास्त्रार्थः सम्पादितः । समानान्तररूपेण एकः संस्कृत-कवि-समवायः समायोजितः, यत्र कवीनां मनोरमैः काव्यपाठैः समुपस्थिताः सहृदया आनन्दमन्वभवन् । अन्तिमे समापनसत्रे मद्रासविश्वविद्यालयतः प्रकाशितानां न्यू-कैटैलोगस-कैटैलोगरम् इति त्रयाणां नवग्रन्थानां लोकार्पणं जातम् । नैकैः प्रतिभागिभिः स्व-स्वग्रन्थाः समायोजकाय संस्कृत-शिक्षा-केन्द्राय उपहाररूपेण प्रदत्ताः । इत्थम् चिरपत-प्रपण्डविद्या-अमरजीव-लोचन-सम्न्यङ-ल्यौरमसाई-कृतया सुव्यवस्थया अतिभव्यतया षोडशं विश्व-संस्कृत-सम्मेलनं सम्पन्नम् ।

हरिदत्तः शर्मा
अन्ताराष्ट्रिय-संस्कृताध्ययन-समवायस्य
परामर्शदात्र्याः समितेः सदस्यः

विद्युद्दूतस्य एकादशाङ्कः समाप्तः